च तत्तच्छब्दे वक्ष्यते तथाहि यत्किञ्चिद्घटादौ चक्षुःसन्निकर्षे घटत्वसामान्यधर्म्मज्ञानेन सकलघटादिज्ञानं सामान्यलक्षणाधीनं घटादिज्ञाने च घटादिज्ञानं ज्ञानलक्षणाधीनम्, योगविशेषजनितं सकलघटज्ञानं च एतत्त्रयमलौकिकं प्रत्यक्षं तस्य च अलौकिकत्वात् तदुत्तरं तत्तद्विषये साक्षात्करोमीति नानुव्यवसायः किन्तु जानामीत्येवानुव्यवसाय इति भेदः ।

**अल्प** त्रि० अल–प । १क्षुद्रे, २ईषदर्थे, ३सूक्ष्मे, ४मरणार्हे । “अथ यदल्पं तन्मर्त्यम्” छा० उ० । स्वार्थे कन् अल्पकमप्यत्र । ५यवासे पु० । अल्पत्वञ्च यस्य वस्तुनः यावती इयत्ता उचिता ततोन्यूनत्वम् तत्त्वं च परिमाणभेदः अपेक्षाबुद्धिविशेषविषयत्वमपकर्षाधायकधर्म्मविशेषो वा तेन द्रव्यगुणादिधर्म्मत्वं तस्य । तच्च जातिगुणक्रियाद्रव्येषु भवति अल्पा नदी अल्पः श्यामः अल्पं ज्ञानं अल्पः पाकः अल्पोऽवकाशः । “क्वचाल्पविषया मतिः” रघुः । “अल्पप्रयोजनकृतोरुतरप्रयासैः” माघः । “प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते” मनुः । अस्य गुणपरतापि “करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्येति” पाणिन्युक्तेः अल्पान्मुक्तः अल्पतया मुक्त इत्यर्थः । वीप्सार्थे शस् । अल्पशः अव्य० । “पतितापत्रस्तैरल्पशः” पा० । अस्य संख्यावद्गुणवचनत्वात् अतिशायने इष्ठन् ईयसुन् च । अल्पिष्ठः अल्पीयान् स्त्रियां ङीप् । “संख्यायाः अल्पीयस्याः” वार्त्ति० अत्र प्रकृतेर्वा कन् । कनिष्ठः कनीयान् “कनीयान् वृषमुत्सृजेत्” स्मृतिः “भ्राता ज्येष्ठः कनिष्ठो वा” स्मृतिः । भावे इमनिच् अल्पिमा पु० ष्यञ् आल्प्यम् पु० स्त्री तल् अल्पता । स्त्रीत्व अल्पत्वं न० क्षुद्रपरिमाणे ।

**अल्पकेशी** स्त्री अल्पः केश इव पत्रमस्याः । भूतकेशीवृक्षे ।

**अल्पगन्ध** न० अल्पो गन्धोयस्य । १रक्तकैरवे । २स्वल्पगन्धयुक्तमात्रे त्रि० । एकान्तसम्बन्धे इच् समा० । अल्पगन्धिः तत्रैव त्रि० ।

**अल्पतनु** त्रि० अल्पा क्षुद्रपरिमाणा तनुः शरीरं यस्य १खर्व्वे, २दुर्बले, ३स्वल्पास्थियुक्ते च । पत्रके २इक्षुमात्रे च ।

**अल्पपत्र** पु० अल्पं पत्रं यस्य । १क्षुद्रपत्रयुक्ततुलसीभेदे स्वल्प-

**अल्पपद्म** न० अल्पमसम्पूर्णं पद्मम् । रक्तकमले रत्नमा० ।

**अल्पप्रमाण** पु० अल्पं प्रमाणमस्य वा कप् । (तरमुज) (खरमुज) वा इति १ख्याते वृक्षे । २अल्पप्रमाणयुक्ते त्रि० ।

**अल्पप्राण** पु० अल्पः प्राणः प्राणनक्रिया यस्मिन् । वर्णभेदे यस्योच्चारणे अल्पप्राणवायोर्व्यापारस्तस्मिन् । स च शिक्षायामुक्तः “अयुग्मवर्गयमगायणश्चाल्पासवः स्मृताः” इति तथा च वर्गेषु प्रथमतृतीयपञ्चमवर्णाः यमगाः यवरलाश्च अल्पासवः । कर्म्म० । २ताद्दशवर्णोच्चारणवाह्यप्रयत्ने । वाह्यप्रयत्नास्तु एकादशधा “विवारः संवारः श्वासोनादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति” सि० कौ० । अल्पः प्राणः प्राणहेतुकं बलमस्य । ३अल्पबले त्रि० । [शाके ।

**अल्पमारिष** पु० अल्पः मारिषः शाकः कर्म्म० । (नटिया)

**अल्पमेधस्** त्रि० अल्पा मेधाऽस्य असिच् समा० । अल्पधारणायुक्तबुद्धौ धारणा च दृढसंस्कारः ।

**अल्पम्पच** त्रि० अल्पं पचति पच–खश् मुम् उप० स० १मितम्पचे आत्मम्भरौ कृपणे । करणस्य कर्त्तृत्वविवक्षायाम् । २अल्पपाकसाधने पात्रादौ ।

**अल्पशमी** स्त्री कर्म्म० । क्षुद्रायां शम्यां शम्याकारे क्षुद्रवृक्षे ।

**अल्पसरस्** न० अल्पं सरः कर्म्म० । (डोवा) क्षुद्रजलाशये ।

**अल्पायुस्** पु० अल्पमायुः जीवनकालो यस्य । १छागे पशुषु तस्यैवाल्पायुष्कत्वात् तथात्वम् । २अल्पजीवनकाले त्रि० । “दुराचारोहि पुरुषो लोके भवति निन्दितः । दुःखभागी च सततं व्याधितोऽल्पायुरेव च” मनुः वा कप् अल्पायुष्कोऽप्यत्र । कर्म्म० । यस्य यावदायुरुचितं ततोऽल्पमिते । जीवनकाले ३आयुश्च जीवनकालः “शतायुर्वै पुरुष” इति श्रुतेः शतवर्षावच्छिन्नजीवनकालोनराणामाद्युः । एवमन्येषामायुःपरिमाणमायुःशब्दे वक्ष्यते । तत्र विशेषकालतायां ज्योतिषोक्तग्रहयोगस्य सूचकता यथा जातकालङ्कारे । “आयुर्मूलं जन्मिनां जीवनं स्यादाजीवानां निर्जराणां सुधेव । एतस्माद्धः पूर्व्वमाचार्य्यवर्य्यास्तस्मादायुर्योगजाख्यं प्रवक्ष्ये । लग्नाधीशोऽतिवीर्य्यो यदि शुभविहगैर्वीक्षितः केन्द्रयातैर्दत्ते ह्यायुः सुदीर्घं गुणगणसहितं श्रीयुतं मानवानाम् । सौम्याः स्त्रीयालयस्था जनुषि च रजनीनायके स्वीयतुङ्गे वीर्य्याढ्ये लग्ननाथे वपुषि च शरदां षष्टिरायुर्नराणाम् ॥ सौम्याः केन्द्रालयस्था वपुषि सुरगुरौ लग्नतोवा सुधांशोरायुर्युक्तं न दृष्टं न च गगनगतैः सप्ततिर्वत्सराणाम् । याता मूलत्रिकोणे शुभगगनचराः स्वीयतुङ्गे सुरेज्ये लग्नाधीशोऽतिवीर्य्यो गगनवसु ८० समासंख्यमायुर्नराणाम् ॥ सौम्ये केन्द्रेऽतिवीर्य्ये यदि निधनपदं खेटहीनं समाः स्युस्त्रिंशत् सौम्येक्षितं चेद्गगनेहिमकरैः संयुतोऽथ स्वभे चेत् । स्वल्पांशे चामरेज्ये मुनिनयन २७ मितं स्वर्क्षगो लग्नगो वा चन्द्रोद्यूने शुभस्थे दु-